# Shri Rajnistutih

# श्रीराज्ञीस्तुतिः

## Document Information

Text title : Rajni StutiH

File name : rAjnIstutiH.itx

Category : devii, devI, otherforms, stuti, aShTaka

Location : doc_devii

Transliterated by : Harmander Singh

Proofread by : Harmander Singh

Latest update : August 13, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

August 13, 2024

*sanskritdocuments.org*

# श्रीराज्ञीस्तुतिः

ॐ संसारसागरमहं तरितुं सुनौकां
राज्ञीं नमामि शिरसा शिवसुन्दरीं त्वाम् ।
सर्वेश्वरीं सकललोकसुखप्रदात्रीं
त्वामेव देवि सततं शरणं प्रपद्ये ॥ १॥

मातः पयोधरयुगं पिबतु त्वदीयं
नागाननर्तुमुखवत्सलपुत्रयुग्मम् ।
निर्णेजनाम्बुन इह स्पृहयाम्यहं तु
त्वत्पादपद्मयुगलस्य भवाग्निशान्त्यै ॥ २॥

मातस्त्वदीयपरितोषविशेषलब्धे
छत्रे प्रहृष्यतु सदा भगवान्सुरेन्द्रः ।
पीयूषवर्षणकरात्तव देवि पाद-
च्छत्राद्विना किमपि राज्ञि न नाम याचे ॥ ३॥

मोहाटवीविकटसङ्कटपीडितोऽहं
राज्ञी प्रपन्नपरमार्तिहरा त्वमेका ।
जाज्वल्यतेऽम्ब हृदयार्तिकरो ममान्तः
पापाग्निरेशि शमयैनममास्वरूपे ॥ ४॥

आरारटीमि करुणं भवतापतप्तः
प्रोल्लालपीमि पतितो भवदुःखसिन्धौ ।
मोमोर्मि राज्ञि लुठितो भवसर्पदष्ट-
स्त्वामन्तरेण शरणं मम कः शरण्ये ॥ ५॥

राज्ञि प्रपन्नवरदे सुकृतादपर्णां
त्वामाश्रितोऽस्मि सुचिरात्तु महद्विचित्रम् ।
किं नास्मि भैरवि ऋणैस्त्रिविधैर्विमुक्तः
पाशैरिवोत्कटविषाक्तभुजङ्गमानाम् ॥ ६॥

राज्ञि प्रसीद नतसौख्यकरे मृडानि
रुद्राणि रोगहरणे चतुरे प्रसीद ।
शर्वाणि सर्वजनपापहरे प्रसीद
गौरि प्रसीद गुणगौरि शिवे प्रसीद ॥ ७॥

कल्याणि राज्ञि जगदीश्वरि विश्वमात-
स्त्वामन्तरेण नहि देवि सुखं जनस्य ।
पुत्रस्य दुःखहरणे सततोद्यता द्राक्
मातैव हि स्नुतकुचा नु भवत्यवश्यम् ॥ ८॥

राज्ञष्टकमिदं पुण्यं यः पठेद्धर्षपूरितः ।
सोऽत्र द्राक् प्राप्नुयात्कामान्परलोके च स्वर्गतिम् ॥ ९॥

इति श्रीराज्ञीस्तुतिः सम्पूर्णा ।

Encoded and proofread by Harmander Singh

*Shri Rajnistutih*

pdf was typeset on August 13, 2024

Please send corrections to *sanskrit@cheerful.com*